देश्रीब्रह्मनारदसंवादे॥शंखस्थितेनतोयेनयःस्नापयतिमाधवं॥द्वादशपांचिंद्रमात्रेणकुलानांता
रयेच्छतं॥एवंब्रह्मादिभिरपिसंस्तुत्यापनंमाहात्म्यंवक्तुंरमनसंदर्यं॥त्वंपुरासागरोत्पन्नेविदि
स्तुनाविधृतःकरे॥मानितःसर्वदेवैश्चपांचजन्यनमोस्तुतेगर्भदेवारिनारीणांविलीयंते
सहस्रधा॥तवनादेनपातालेपांचजन्यनमोस्तुते॥दक्षिणावर्तशंखेनतिलमिश्रोदकेनच॥
उकेनाभिमात्रेतुयःकुर्यादभिषेचनं॥प्राकृस्नोतसिचनद्यांवैनरस्त्वेकाग्रमानसः॥यावज्जी
वकृतंपापंतत्क्षणादेवनश्यति॥दक्षिणावर्तशंखेनपात्रेजलंवरस्थितं॥उदकंयःप्रतीच्छेतशिर
साहृष्टमानसः॥तस्यजन्मकृतंपापंतत्क्षणादेवनश्यति॥घंटावाद्यंचनितरांस्नानकाले
प्रशस्यते॥यतोभगवतोविष्णोस्तत्सदापरमप्रियं॥अथघंटामाहात्म्यं॥उक्तंचस्कांदेब्रह्म
नारदसंवादे॥स्नानार्चनक्रियाकालेघंटानादंकरोतियः॥पुरतोवासुदेवस्यतस्यपुण्यं
फलंशृणु॥वर्षकोटिसहस्राणिवर्षकोटिशतानिच॥वसतेदेवलोकेतुअप्सरोगणसंवि
तः॥स्कांदेवा॥कृत्वापुष्पगृहंविष्णोः॥पुष्पैर्वानेहितानकांफलंनेयोगमायातिराजसूया
श्वमेधयोः॥स्कांदेचतत्रैव॥येकुर्वंतिपुष्पैस्त्रिलोकेशमर्चयंतिजनार्दनं॥तेभ्यःक्रुद्धोभयंदुःखंको

धंविष्णुःप्रयच्छतिउन्मत्तकेनयेमूढाःपूजयंतित्रिविक्रमं॥अम्लादंदारुणंतेभ्योददातिगरुडध्वजः
॥कांचनारमयैःपुष्पैर्येऽर्चयंतिसुरद्विषं॥दारिद्र्यंदुःखवक्तुंनतेभ्योविष्णुःप्रयच्छति॥गिरिकूर्णि
कयाविष्णुयेर्चयंत्यबुधानराः॥तेषांकुलत्रयंधोरंकुरुतेमधुसूदनः॥इति॥विहितेषुनिषिद्धा
नांविहितोलाभतोमतंकुसुमानामुपादानं॥निषिद्धानांनकर्हिचित्॥तथाचपाद्मे॥विहितंप्र
तिषिद्धैस्तुविहितात्मामतोर्चयेत्॥तथाकोर्मेश्रीव्यासगीतायां॥पुष्पेशाकोदकेकाष्टेतथा
मूलेफलेतृणे॥अस्तेयादानमस्तेयंमनुराहप्रजापतिः॥गृहीत्वाणिपुष्पाणिदेवार्चनविधौ
द्विजात्॥नेकस्मादेवनियतमनन्वाप्यकेवलमिति॥क्लिष्टंपर्युषितंचभ्रमिपतितंछिन्नंकी
टान्वितंयत्केशोपहतंचगंधरहितंयच्चायगंधान्वितं॥हस्तेयद्विधृतंप्रणामसमयेयद्धामह
स्तिकृतंयच्चातर्जलधौतमर्चनविधौपुष्पंचतद्दूषयेत्॥भक्त्यायद्दिदयादिकंत्रितिरुहंवोत्पाद्य
यच्चस्तूतंयच्चाकम्यसमाहृतंततदपिवलंपुष्पंभवत्यासुरं॥चौर्यंकृष्णमनुक्रिदृष्टमशुचि
स्पृष्टंयदघ्रातमधोवरेविनिहितंकीटैश्चतद्दूषयेत्॥विष्णुधर्मोत्तरे॥पुष्पाणा
वेनयादद्याद्दद्दर्वीकुरानपिपुण्यमवाप्नोतिपुष्पदानस्यवैद्विजाः॥पुष्पाणावाहृदेयानिप
त्राण्यपिजनार्दने॥पत्राभावेपयोदेयंतेनपुण्यमुपाश्नुते॥पुष्पाणांदानेफलविशेषाःग्रंथा

लिखितया न लिखितः ॥ गरुडः ॥ तुलसीं प्राप्य योनित्यं न करोति ममार्चनं । तस्याहं प्रतिगृह्णामि न पूजां शतवार्षिकीं ॥ एवंदमनकरुवकविल्वपत्रदूर्वादिफलमनुसंधेयं ॥ नविप्रसदृशंपात्रं नदानं तुरभीसमं । नवर्गंगासमं तीर्थं । नयत्रंतुलशीसमं ॥ आदित्ये ॥ मणिकांचनपुष्पाणितथा मुक्तामयानिव ॥ तुलसीपत्रदानस्य कलांनार्हतिषोडशीं ॥ तत्रादौमंत्रः ॥ ॐकादे ॥ तुलस्यमृतजन्मासि सदात्वंकेशवप्रिये ॥ केशवार्थं विचिन्वामि वरदाभवशोभने ॥ त्वदंगसंभवैः पत्रैः पूजयामि यथाहरिं ॥ तथाकुरुपवित्रांगि कलौमलविनाशिनि ॥ नच्छिंद्यात्तुलसीं विप्रा द्वादशीं वै कदाचन ॥ द्वादशंतुलशीपत्रंधात्रीपत्रंचकार्तिके ॥ लुनातिसनरोगस्तुश्रिया नतिगर्हितान् ॥ अथोगोपांगपूजा ॥ मंत्रवर्णंयदान्यादेवतन्मंत्रस्यदेवुच ॥ वेणुंचमालांश्रीवत्सं कौस्तुभंचयथास्यदं ॥ ततश्चमूलमंत्रेणहृदयपुष्पांजलित्रयं ॥ प्रार्थ्यानुज्ञांभगवतोर्चयेद्देवतांस्वप्रत्येकमावाह्यस्नानादिपरिकल्प्यचपूजयेदंधयुग्मंयथास्थानंयथाक्रमं ॥ अथावरणपूजा ॥ कर्णिकायांचतुर्दिक्षुपीतमानप्रभांसखीनांदामसुदामंवसुदामंकिंकिणिर्नयजेत् ॥ इतिप्रथमावरणं ॥ तद्बहिश्चाग्निकोणादौकेशवंगरुडंयजेत् ॥ हृदयादिपुतांपूज्यांस्तत्तत्स्ववर्णदिशोभितान् ॥ इतिद्वितीयं ॥ ततोबहिश्चपूर्वादिदिग्दलेषुसुप्रभांमहिषींरुक्मिणीं सत्यभामांनाग्निजितींकमातरंसुनंदांमित्रविंदांचपूज्यांथसुरदक्षिणां ॥ सैंज्यांवतींसुशीलांचतत्तद्व्यादिभूषितां ॥ इतितृतीयं ॥ पूर्वादिचतुष्टदलाग्रेषुवसुदेवंचदेवकीं ॥ श्रीनंदंश्रीयशोदांचबलभद्रंसुभद्रिकांगोपानगोपीश्चतद्बाह्यत्रयेणदूरतःस्थिताः ॥ विश्वित्ररूपवेशादिशोभमानानिमान्यजेत् ॥ इतिचतुर्थं ॥ तद्बहिश्चतुरस्रातःपूर्वाद्याशाचतुष्टये ॥ संतानंपरिजातंचकल्पद्रुममथार्चयेत् ॥ हरिचंदनमप्यैंद्र्यांदक्षानंदनकर्णिकायांवसुपूज्यमंदारंदेवदेष्टितः ॥ इतिपंचमं ॥ तद्बहिश्चाष्टदिक्पालान्स्वस्वदिक्ष्वेवपूजयेत् ॥ तत्तद्दिग्जाधिपत्यस्त्रवाहनस्वजनान्वितान् ॥ तद्दर्शनादिव्यवेशाननंतंचतथार्चयेत् ॥ निऋर्त्यवुपयोर्मध्येब्रह्माणंचेद्रुद्रयोः ॥ इतिषष्ठं ॥ ततोबहिश्चाष्टदिक्षुमोलिस्थात्मात्मलक्षणान् ॥ भगवत्पार्षदीस्तत्तद्दर्शायुधविभूषणान् ॥ वज्रंशक्तिंचदंडंचखड्गंपाशांकुशानकमात् ॥ यजेद्गदांत्रिशूलंचचक्राब्जेत्वथऊर्ध्वयोः ॥ तन्माहात्म्यंचविस्तृधर्मांतरे ॥ शंखंचक्रंगदांपद्मं । नोमुसंमुशलंहलंत्रयंह्यापिहरेःशस्त्रंस्मृत्वापापात्प्रमुच्यते ॥ इतिसप्तमं ॥ सर्वानंदप्रद्योतनासद्यावरणपूजनेनाशक्तोगंधत्रयाधातावनित्रयमर्चयेत् ॥ ईदृक्चैकोनिर्ज्ञेयंतत्तन्मंत्रका

कामवतांमतं॥अन्यथागोकुलेकृष्णदेवतत्वदसंभवात्॥एकांतिनिस्कराधाद्यायथाध्यानंप्रभोःप्रि
याः॥प्रथमावरणेपूज्याःकालेकृष्णांतिकंगताः॥ततोगोपकुमाराश्चातद्वयस्यास्ततोबहिः॥नं
दोयशोदारोहिण्यौ॥गोपागोप्यश्चततसमाः॥ततश्चवत्सागावश्चनृपात्वन्यमृगादयः॥श्रीनार
दश्चपरितोत्रमनहर्षभराकुलः॥एवंध्यानपूजादावेकांतिभ्यःप्ररोचते॥कृष्णायरोचतेऽत्यंतं
देवचसतांमतं॥अथाश्रीमन्त्रमाष्टकपूजा॥ततोऽष्टनामभिःकृष्णंपुष्पांजलिंनिर्वपेत्॥कुर्या
त्तैरेवपूजामशक्तोखिलदेःप्रभोः॥श्रीकृष्णोवासुदेवश्चतथानारायणःस्मृतः॥देवकीनंद
नश्चैवयदुश्रेष्टस्तथैवच॥वार्ष्णेयश्चासुराकीर्तभारहारीतथापरः॥धर्मसंस्थापकश्चेति॥चतुर्थ्यं
तैर्नमोयेते॥इत्यावारणपूजा॥॥अथधूपनं॥सगुग्गुल्वगुरुशीशिताज्यमधुचंदनैःसारंगा
रविनिर्हितैः॥कल्पयेद्धूपमुत्तमं॥अत्रमंत्रः॥वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः॥आघ्रेयः
सर्वदेवानां॥धूपोयंप्रतिगृह्यतां॥अग्निपुराणेच॥नशल्लकीजंतुतृणंनशल्करसंसृतं॥धू
पंप्रतंगनिर्मुक्तंदद्यात्कृष्णायबुद्धिमान्॥स्कांदे॥येकृष्णायुरुणाकृष्णंधूपयंतिकलौनराः
॥सकर्पूरेणराजेंद्रकृष्णतुल्याभवंतितेः॥साज्येनवेगुग्गुलुनासुधूपेनजनार्दनं॥धूपयित्वा
नरोयातिपदंतस्यसदाशिवं॥अगुरुंतुसकर्पूरंदिव्यंचंदनसोरभं॥दत्वानित्यंहरेर्भक्त्याकृ

लानांनारयेच्छतं॥अथप्रदीपदानं॥दीपंप्रज्वालयेच्छक्त्याकर्पूरेणघृतेनवा॥गव्येनतत्रासमर्थ्य
॥तैलेनापिसुसंधिता॥॥प्रदीपयेत्॥तत्रमंत्रः॥सुप्रकाशोमहान्दीपःसर्वतस्तिमिरापहः॥स
वाह्याभ्यंतरज्योतिर्दीपोयंप्रतिगृह्यतां॥॥दीपकप्रसंगे॥॥ग्राह्यात्रिकंतुविषमंबहुवर्त्तिसमन्वि
तं॥॥अभ्यर्च्यत्रामचंद्रायवाममध्वमथापियेत्॥नमोदीपेश्वरायेति॥दद्यात्पुष्पांजलिंततः
॥अवधूप्यांघ्र्यवाद्यैर्हरिंनीराजयेत्प्रभुं॥अतएवोक्तेतस्यकराभ्यांवंदनंवतेः॥नामचारण
त्रिकेत्यादि॥वर्त्मापिवकुलासमाः॥॥विष्णुधर्मोत्तरे॥॥दीपदानात्परंदानंनभूतंनभविष्यति॥
केशवोयतमेकृत्वादीपवृक्षंमनोहरं॥॥अतीवधाजतैलंवाघृतंवादिवमासाद्यसंवृतः॥॥दीपमा
लांप्रयच्छंतियेनराशाङ्गिलोगरेः॥भवंतिचंद्रसमाःस्वर्गमासाद्यमानवाः॥दीपागारेनरःकृत्वाकु
टागारंनिभंशुभं॥किंशवालयमासाद्यलोकेभातिसशक्रवत्॥यथोज्वलोभवेद्दीपःसप्रदाताधि
यादवा॥तथानित्योज्वलोलोकेनाकपृष्ठेविराजते॥सदीपंवयद्यादेशेवत्सरेषुफलंवदे॥॥चतु
र्थादीपस्यदातारोभवंतिसफलेक्षणाः॥एकादश्यांवहादश्यांप्रतियत्नंतुयोनरः॥दीपंददातिकृ
ष्णायतस्यपुण्यफलंशृणु॥सुवर्णमणिमुक्ताद्यैर्मनोज्ञमतिसुंदरं॥दीपमालाकुलंदिव्यंविमा
नमधिरोहति॥॥पद्मसूत्रोद्भवाद्वर्त्तिंगंधतैलेनदीपकान्॥विधायः॥सुभगश्चेवदत्वाभवतिमान

वः।दीपदानंमहापुण्यंमन्यदेवेषुपिक्रवः।किंपुनर्वासुदेवस्यानंतस्यचमहात्मनः॥तत्रैवतीयकाले॥यावत्कल्पंभगवतोदीपोदेवालयेज्वलेत्।तावद्वर्षसहस्राणिनाकपृष्ठेमहीयते॥ब्रह्मणारदीये॥दीप्तिहोत्रंप्रतियज्ञंध्वजस्यनिजपूर्वजन्मवृत्तंकथने।प्रदीपस्थापितस्तत्रचसुरताधिहिजो।तमातेनापिममदुष्कर्मनिःशेषंक्षयमागतं॥नारदीयेच॥तिष्ठंतुबहुवित्तानिदानार्थंवरवर्णिनि॥हृदयायासकर्त्तॄणिदीपदानाद्दिवंव्रजेत्॥तस्माप्यभावेसुभगेपरदीपप्रवोधनं।कर्त्तव्यंभक्तिभावेनसर्वदानाधिकंक्षयत्।सदाकालविशेषेपिभक्त्यामगवदालये।महादीपप्रबोधि

रिगंडूषंवामपाणिना।दर्शयेद्रासमुद्रांतुप्रफुल्लोत्पलसंनिभं।प्राणादिमुद्राहस्तेनदक्षिणेनतु
दर्शयेत्।मंत्रैश्चतुर्थीम्वाहांतैस्तारादैस्तत्तदाकृतेः।ततःस्पृशंश्चकरयोर्युष्टभ्यामनामिकाप्र
दर्शयेन्नैवेद्यस्यमुद्रांतत्स्पमनुंजपन्।अन्यच्च॥शालीक्षंसुभक्तंशिशिरकरसितंपायसापूपसू
पंलेह्यंपेयंसुखाद्यंमितममृतफलंयाकिकाद्यंसुरवाद्यं।आज्यंप्राज्यंसमिज्यंनयनरुचिकरंराजि
कैलामरीवस्त्वादीयः॥करजापरिकरममताहारजोषंजुषस्व॥गरुडपुराणे।नैवेद्यपरयाभ
क्त्याघटाद्यैर्जयनिस्वनैः।नीराजनेश्चहरयेदाद्यंपासनेबुधः॥स्कांदेश्रीब्रह्मपार्ववचनंमिके
शवस्यमहात्मनेः।हरण्यंराजतंताम्रं कांस्यंमन्मयमेववा।पालाशंपद्मपर्णंवापत्रंदद्यात्प्रयत्नतः
प्रियंपात्रपरिमाणेचोक्तंदेवीपुराणे॥षट्त्रिंशदंगुलंपात्रमुत्तमंपरिकीर्त्तितं।मध्यमंचत्रिभा
गोनंकनिष्ठंद्वादशांगुलं।वस्त्रंगुलविहीनंतुनपात्रंकारयेत्क्वचित्॥अथभोज्यानिएका
दशस्कंधे॥गुडापायसपीर्षिाशष्कुल्यापूपमोदकान्।संयावदधिसूपांश्चनैवेद्यंसतिं
कल्पयेत्किंचा।यद्यदिष्टतमंलोकेयच्चापिप्रियमात्मनः॥तत्तन्निवेदयन्मह्यंतदा
नंत्यायकल्पते॥षष्ठस्कंधे॥नैवेद्यंवाधिगुणंदद्यात्पुरुषतुष्टिदं॥बोधायनस्मृतौच॥
नानाविधान्नपानेश्चभक्ष्यापाद्यैर्मनोहरैः।नैवेद्यंकल्पयेद्विष्णोस्तदभावेसपायसं

विष्णुधर्मोत्तरेतथाचामरदानेनश्रीमान्भवतिभूतले।मुच्यतेनतथापापैस्वर्गलोकंचग
च्छति।अथछत्रस्यतत्रैव।छत्रंबहुशलाकंचाकल्पंरत्नवस्त्रसंयुतं।दिव्यवस्त्रैश्चसंयुक्तंह
मदंडसमन्वितं।यःप्रयच्छतिकृष्णस्याछत्रलक्षायुतंहितः।प्राप्नुतेसोमरैसार्द्धंकोटितिद
निःसरुं।तत्रैवान्यत्र।राजाभवतिलोकेस्मिंछत्रंदत्वाद्विजोत्तमात्।नश्राम्यतिरिपुंदु
रंतंसंग्रामेरिपुजिद्भवेत्।श्रृंजस्यतत्रैव।लोकेतुध्वजभृत्स्याद्दत्वाविष्णोर्वरध्वजं।के
शवायद्विजश्रेष्ठःस्वर्गलोकेमहीयते।इति।यत्प्रसादेध्वजारोपोमाहात्म्यलिखितंपुरा
।तदत्राप्यविलेज्ञेयंतत्रात्रत्पमिदंतथा।किंचविष्णो।विष्णोध्वजेतस्मैवर्णो।देईऊ
र्यादद्विचक्षणःपताकावापिपीतास्यात्।गरुडस्यसमीपगाध्वजनस्याविष्णुसमीपगं
नरःतालक्षंतप्रदानेनविष्णोर्लोकंप्रपद्यते।विनानस्यतत्रैव।वितानकप्रदानेनास
र्वपापैःप्रमुच्यते।परांनिर्वृतिमाप्नोति।यत्रयात्रानिजायते।खड्गादीनां।दत्वानिस्त्रिं
शकानाविष्णोशत्रुभिर्नाभिभूयते।दत्वातद्धनंसुरम्यास्याधेयफलंलभेत्।किं
च।पतद्ग्रहंतथादत्वासुभगस्त्वंजायते।दर्पणप्रदानेनास्थानेसर्वत्रविंदति।दर्पण

स्यवा।दर्पस्यप्रदानेनारूपवान्दर्पवान्भवेत्।मार्जयित्वातथात्वंवासुभगस्त्वंजायते।
स्कंदे।गीतंवाद्यंचनृत्तंस्वानाद्यंविष्णुकर्यासुनायःकरोतिसपुण्यात्मात्रैलोक्या
परिसंस्थितः।मूलागमेस्व।।नीराजनंचयःपश्येद्देवदेवस्यचक्रिणः।सयजन्मनिनि
प्रत्यादैत्यंपरमंपदं।केशवायतनेराजन्कुर्वन्शंखरवंनरः।सर्वपापविनिर्मुक्तो
विमानशतमंकुलंगीयमानश्चगंधर्वैर्विष्णुनासहमोदते।भेरीमृदंगपटह।निःशानो
णाद्यैश्चडिंडिमैः।संतर्प्यदेवदेवेशंलभतेयत्फलंनृणां।देवस्त्रीशतसंयुक्तोत्स
र्वकामसमन्वितास्वर्गलोकमनुप्राप्यमोदतेकल्पयंचकमिति।द्वारकामाहात्म्ये
।शंखंकृत्वातुपानीयंस्नापयित्वाजनार्दनं।संनिधौवसतेविष्णोःकल्पांतंक्षीरसागरे
नीराजनंवानाकृत्वंचेतत्।तोकुलस्यार्थेणात्यरंकेचिदिक्षंतिकेचिच्च।दर्पणाफलंतः
परं।।तथाचाग्नेततोनित्यंदेवस्योपरिपुष्पांजलिंक्षिपेत्।विचित्रैर्मधुरैस्तोत्रैःस्तुतिंकुर्वीत
भक्तिमान्।।एकादशस्कंधे।स्त्रीयज्ञोयंद्विजश्रेष्ठभवद्भ्यमभीप्सितं।तीर्थास्पदंनवविरंचिसु
तेशरण्यंभृत्यार्तिहंप्रणतपालनवाधियोतंवंदेमहापुरुषतेचरणारविंदं।।ग्रंथ

दंडप्रणाममहात्म्यं॥ आगमे॥ दोर्भ्यां पद्भ्यां च जानुभ्यां मुरसा शिरसा दृशा मनसा वचसा चेति प्रणामो
ष्टांग ईरितः॥ जानुभ्यां चैव वाकुभ्यां॥ शिरसा वचसा धियो पंचांगकः प्रणामः स्यात्पूजासु प्रवरा विमा
विति॥ गरुडं दक्षिणे कृत्वा कुर्यान्नत्वं पृष्ठतो बुधः॥ अवश्यं च प्रणामोस्त्री न शक्तश्चेदधिकाधिकान्
॥ विष्णुस्मृतौ॥ जन्मप्रभृतियत्किंचित्पुमान्वैधर्ममाचरेत्॥ सर्वतन्निष्फलंयाति॥ एकहस्तानि
वादनात्॥ वाराहे॥ वस्त्रप्राहृतदेहस्तु योनरः प्रणमेत्तमाश्चित्रीसजायतेमूर्खः सप्तजन्मानिभा
मिनि॥ किंचान्यत्र॥ अग्रेदृष्ट्वा मभोग॥ समीपेगा र्भमंदिरेजपहोमनमस्काराऽन्नकु पीतकेश
वालये॥ अथप्रदक्षिण॥ ततः प्रदक्षिणंकुर्यात्॥ भक्त्या भगवतोहरेः॥ नामानिकीर्तयन्शक्तो
तीवसाष्टांगवंदनं॥ प्रदक्षिणास्संख्योक्ता॥ नारसिंहे॥ एकोच्चैर्यः स्तवैः सप्तभिस्तोदद्या
द्विनायकोवतस्त्रः केशवंदद्यात्॥ शिवंवाऽहं प्रदक्षिणं॥ वाराहे॥ प्रदक्षिणंयेकुर्वंतीभक्ति
युक्तेनचेतसा॥ नतेयमपुरंयांति॥ यांतिपुण्यकृतांगतिं॥ यस्त्रिः पुंप्रदक्षिणंकुर्यात्॥ साष्टांग
कप्रणामकंदशाश्वमेधस्यफलं॥ प्राप्नुयान्नात्रसंशयः॥ विष्णुस्मृतौ॥ एकहस्तप्रणामश्च
एकावैव प्रदक्षिणा॥ श्राकालेदर्शनंविष्णोर्हंतिपुण्यंपुराकृतमिति॥ अथकर्मार्पणं॥ ततः
॥ श्रीकृष्णपादाब्जेदास्येनैवसमर्पयेत्॥ त्रिभिर्मंत्रैः स्वकर्माणिस्थापयेदात्मानमप्यथा॥ मंत्रा

श्चैतेगइतः पूर्वंप्राणबुद्धिदेहधर्माधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाकर्मणाहु
स्तान्पांपद्भ्यासुदरेणशिश्नायत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंश्रीकृष्णार्पणंभवतुस्वाहा॥ मांसदी
यंचसकर्महरयेसमर्पयेरंतत्सदिति॥ अथजपः॥ मंत्रार्थस्मृतिपूर्वंचजपेदष्टोत्तरशतं॥ मूल
लिख्यैवविधिनासंसदेवजपमालया॥ शक्तोष्टाधिकसाहस्रंजपेत्तं चार्पयन्जपं॥ प्राणायामां
श्चकृत्वात्रीन्दद्यात्कृष्णकरेजलं॥ तत्रचार्यमंत्रः॥ गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतं
जपं॥ सिद्धिर्भवतिमेदेवात्वत्प्रसादात्त्वयिस्थिते॥ इति॥ जपप्रकारोयं॥ पेक्षामालादिनिय
मात्मकः॥ पुरश्चर्याप्रसंगेनुसचिलेखिष्यतेयतः॥ अर्पितंतत्स्वीकृत्यस्वीकृतंप्रभुणाऽपि
लेपुनस्तुत्वायथाशक्तिप्रणम्यप्रार्थयेदिदं॥ संत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन॥ यत्
पूजितोमयादेवपरिपूर्णंतदस्तुमे॥ अथअप्रशस्ताः॥ पानेवापादुकेवापिगमनंभगव
द्गृहे॥ देवोत्सवतत्सवाद्यसेवावज्रप्रणामहोदयतः॥ उच्छिष्टवायवाशौचेभगवद्वंदनादिकं
॥ एकहस्तप्रणामश्चतत्पुरस्तात्प्रदक्षिणं॥ पादप्रसारणंचायेनयापर्येकवंदनांश
यनंभक्षणेवापिमिथ्याभाषणमेववा॥ उच्चैर्भाषामिथोजल्पोरोदनाभानिवेदितं॥ हस्तु

ग्रहेषैवनृषुवकूरभाषणं। केवलावरणंचैवपरनिंदापरस्कृतिः। अश्लीलभाषणंचै
वअधोवायुविमोक्षणं। शक्तोगौणोपचारश्चअनिवेदितभक्षणं। तत्कालोद्भवानां
वफलादीनामनर्पणंविनियुक्तावशिष्टस्यप्रदानंव्यंजनादिकेष्टंकृत्वासनंवैवपरे
षामनिवादनंगुरोर्मौनंजिनस्तोत्रंदेवतानिंदनंतथाअपरेशास्तथाविप्रोद्वात्रिंश
त्परिकीर्तिताः। वाराहे। द्वात्रिंशदपराधायेकीर्तितेवसुधेमया।वैष्णवेनसदातेतु
र्क्षनीयाःप्रयत्नतः। यैर्वैनवर्ज्यंत्वेतानपराधान्मयादितान्। सर्वधर्मपरिभ्रष्टाःपर्यं
तेनरकेविशंत्यज्ञाश्चंद्रक्षयंवैकमायुषि। भयावहेध्वांतागारेहरेःस्पर्शःपरंसुकृतना
शनः। तथैवविधिमुल्लंघ्यसहसासर्पणंहरेः। द्वारेद्वादोविनाद्यद्यं। क्रोडमांसनिवेदनं
पादुकाभ्यांतथात्रिलोमंदिशेद्यापसर्पणंकुक्कुरोच्छिष्टकल्पनंमौनभंगोऽक्षतार्चनं।म
थापूजनकालेपिविदुत्सर्गापसर्पणं। श्राद्धादिकमकृत्वावनवान्नस्यचलक्षणं। अश्व
त्थनारोधमाल्यादिधूपनंमधुघातिनः। अकर्मण्यप्रसूतेनपूजनंचहरेस्तथा। अकृत्वादं
तकाष्ठंचकृत्वानिष्ठुवनंवयः। स्पृष्ट्वारजस्वलांदीपंतथास्तमेवच्चकर्णीलमधीत्यचा

वकोमक्षिनंपतंपरिधापमृतंदृष्ट्वाविसुच्यापानमारुतं। क्रोधंकृत्वाश्मनंत्यक्त्वाभूत्वाथजी
र्णयुक्। भक्षयित्वाक्रोडमांसंपिण्याकंजालपादकं। तथाकुक्कुटशाकंचतैलाभ्यंगंविधाय
वाहरेःस्पर्शाहरेःकर्मकरणंपातकावहं। ममशास्त्रंवहिःकृत्वाअस्माकंयःप्रपद्यते। सु
कृतंममशास्त्राणिशास्त्राणिशास्त्रमन्यत्रभाषते। मद्यंपलंसमासाद्यप्रविशेद्वनंम
मयोमेकुक्कुटंभक्षंकेनप्राणंकुरुतेनरः॥ पूजायर्युषितैः पुष्पैःस्त्रीकर्मगर्वकल्पनं। तिर्यक्पुं
ड्रधरोभूत्वायःकरोतिममार्चनं। याचितैःपत्रपुष्पाद्यैर्यःकरोतिममार्चनं। अत्रप्रक्षालितपादो
यःप्रविशेन्ममगंदिरं। अवेलवस्यपक्वान्नंपोमह्यंविनिवेदयेत्। अवेलवेषुपश्यत्सुममपूजां
करोतियः। अपूजयित्वाविघ्नेशंसंभाष्यचकथांलिनांतरःपूजांतुयःकुर्यात्तयैवतंरवीं
भसातथैवधर्मलिप्तांगोममपूजांकरोतियः। ज्ञेयपरेप्रिवहोपराधाःसदासमतेः। आचारः
शास्त्रविहितनिषिद्धातिक्रमादिति। ममदृष्टेरनिस्तुरवंतोवृंतंचवर्जयेत्तुपः। उरुचूकपलाश
रुद्धैःपुष्पैःकुर्यान्ममार्चनं। समाचांमामुरकालेयत्करोतिविमूढधीः। पीठासनोपविष्टो
यापूजयेद्वामिरासनः। वामहस्तेनमौष्ट्वास्तापयेविमूढधीः। अथापराधलक्षमाणं। त
तोपरोधानश्रीकृष्णसंहितायेतासकानकीर्तयन्श्लोकानुत्तमाभ्रसांप्रदायिकान्। तथाहि

अपराधसहस्राणिक्रियंतेहर्निशंमया।दासोहमितिमोमत्वा क्षमस्वमधुसूदन॥कांदेश्रीब्रह्मना
रदसंवादे॥कृष्णोन्नीर्णेतुनिर्मील्यंयस्यांगंस्पृशतेमुने।सर्वरोगैस्तथापापैर्मुक्तोभवतिनारद॥विष्णोर्नि
र्माल्यशेषेणगात्रंयस्यपरिमार्ज्जयेत्।दुरितानिविनश्यंतिव्याधयोयांतिखेदशः।मुखेशिरसिदेहेतु
विष्णून्नीर्णेतुयोवहेत्।तुलसीमुनिशार्दूलनतस्यस्पृशतेकलिः॥पादोदकेनदेवस्यहत्यायुतसं
न्वितः।शुद्धतेनात्रसंदेहस्तथाशंखोदकेनहि॥स्कांदे॥शालग्रामशिलातोयंविंदुमात्रंतुयःपिबे
त्तस्यवर्षार्जितंपापंप्रयातेमुक्तिमार्गकृतोद्यमः॥सौपर्णेव॥विष्णुपादोदकंपीत्वाभक्तपादोदकंतथा
पत्राद्यामतिसंमोहाद्ब्रह्महासनिगद्यते॥इति॥ततःशुद्धयेयःपूर्णंगंधपुष्पाक्षतादिभिर्तंआधा
रोपरितंन्यस्येच्छुंखभंगबदग्रतः॥विष्णुधर्मोत्तरे॥पत्रंपुष्पंफलंकाष्ठंत्वक्शाखापल्लवांकुरं
॥तुलसीसंभवंमूलंपावनंमृत्तिकादपि॥होमंकुर्वंतियेविप्रास्तुलसीकाष्ठवह्निना॥तेवै
लक्षेनवेत्तुएषमग्निष्टोमशतोद्भवं॥नैवेद्यंपचतेयस्तुतुलसीकाष्ठवह्निना।मेरुतुल्यंभवे
दन्नंतदन्नंकेशवायहि।शरीरंदह्यतेयेषांतुलसीकाष्ठवह्निना।तेषांपुनरावृत्तिर्विष्णुलोकात्
तकथंचना॥स्नातोयदिमहीपालैरगम्यागमनादिकैः।मृतःशुद्धतिदाहेनतुलसीकाष्ठवह्नि
ना॥तीर्थंयदिनसंप्राप्तंस्मृतिर्वाकीर्तनंहरेः॥ब्रह्मोवाचपुराणे॥यःश्राद्धकालेहरिभुक्तशे
षंददातिभक्त्यापितृदेवतानांतेनेष्टंस्यात्तुलसीविमिश्रितानाकल्पकोटिंपितरःसुतृ

प्तास्तथाश्रयश्रीभगवद्दर्पणेनिषिद्धंनिवेदितंयदन्यस्मैतदुच्छिष्टंहिकथ्यते॥अतःकथंचिद्दयितन्नश्रीभ
गवतेर्प्पयेत्॥कूर्मपुराणे॥अभक्ष्यंथित्वागोविंदं येभुंक्तेधर्मवर्जितः॥श्वानविष्ठासमंचान्नंनीरं
सुरयासमं॥योमोहादथवालस्यादकृत्वादेवतार्चनं।भुंक्तेसयातिनरकंशूकरेष्विहजायते॥स्कं
दे॥श्रीमार्कंडेयभगीरथसंवादे।दशमीशेषसंयुक्तंदिनंवैष्णववल्लभं॥नोपासतेमहीपालातेषां
वैभागवतानराः॥प्राणात्ययेनचाश्नंति॥दिनंप्राप्यहरेर्नराः।कुर्वंतिजागरंरात्रौ।सदाभागवतो
हितं॥उपोष्यद्वादशीशुद्धारात्रौजागरणान्वितं॥अल्पांतुसाधयेद्यस्तुसवैभागवतोनरः॥इ
ति॥कर्मिणांभगवद्दर्पणादिनतद्दानबुद्धावाभक्तिहेतुः॥तृतीयस्कंधे॥तितिक्षवःकारुणिकाः
सुहृदःसर्वदेहिनां।अजातशत्रवःशांताःसाधवःसाधुभूषणाः॥पंचरात्रे॥अप्रोक्षितोयदा
गच्छेद्देवोगृहमधिनः।शतजन्मार्जितंभस्मपशुपुष्पमादायगच्छति॥किंविधानादिनेदंत्रिसं
ध्यंवृथकृथक्॥प्रोक्तःपूजाविधिर्विज्ञैस्तत्तत्कामास्तुसिद्धये॥अथवैकालार्च्चनविधिवि
धिविशेषः॥तंत्रे॥आराधनेविधिंवक्ष्येप्रातःकालेविशेषतः।वनेहंदावनंध्यायेत्पुष्पवृक्षादिसं
वृतं।पुन्नागेर्नागवृक्षैश्चपनसैश्चवकांचनैः॥वकुलैश्चवविल्वैश्चवनैःकुरुवकैरपि॥सर्व

DR BHAU DAJI MEMORIAL

र्नुकूलमोपेतैः पुष्पावनतशाखिभिः तन्मध्ये पुलिनं ध्यायेद्बहुपुष्पकचंपकं॥ क्षुद्रद्वीपैर्वितानेन पुष्पमाल्याविभूषितं। मुक्तादामपताकाभिर्वन्यपुष्पैरलंकृतं॥ तन्मध्यकल्पवृक्षस्य छायायांपंकजासने॥ सुस्थितं वेणुगीतासु सर्वाभरणभूषितं। वनमालापरिक्षिप्तगोपिकाशतवेष्टितं॥ देवासुरैश्च सिद्धैश्च गन्धर्वैरप्सरोगणैः। यक्षविद्याधरगणैर्विहगैश्चसुसंस्थितैः॥ ब्रह्मर्षिस्तूयमानं कृष्णं चैवं सुचिस्मितं। नानाविधैश्चगोपालैर्गोपस्त्रीभिर्विभूषितं॥ लालिद्यमानंप्रणयात्पश्चान्नीलकोटिभिः॥ इंदीवरनिभंदिव्यसुंदरंत्रिदिरालयं। संपूर्णचंद्रवदनं पद्मपत्रनिभेक्षणं। पद्माभपाणिपादंचपद्मरागवरार्चितं। शरण्यंसर्वलोकानां गोपीनांप्राणवल्लभं। एवंध्यात्वार्चयेन्नित्यं षोडशोपचारतः। शुद्धस्फटिकसंकाशं हेमसूत्रसमन्वितं। सौवर्णपात्रे गोपालं ग्रासंकांस्येनिवेदयेत्॥ एवंसमर्चयेद्भक्त्या जपेन्मंत्रंसमाहितः॥ मध्याह्ने संप्रवक्ष्यामि पूजांसर्वार्थसिद्धिदां। सौवर्णपर्वतेमूलेधातुभिः समलंकृते॥ तस्मिन्सत्पुलिनेरम्ये छायायांपंकजासने॥ सौवर्णमंडपसम्यग्वितानादिविभूषिते। मालादिरचितैरम्यैर्मणिभिः पुष्पशोभिते॥ सुवर्णरत्नसंदोहैरंतरांतरशोभिते॥ सिंहासनेसनेसमासीनं विश्वोत्तंकसमुद्भवं। मुक्तामयैःसुरुचिरैर्हारैर्दीप्तिविभूषितं॥ ध्यात्वासम्यग्विशुद्धात्मा जातीपुष्पैःसमर्चयेत्॥ महारजतपात्रेतु नेद्यान्निवेदयेत्। दद्याद्ग्रासंसखीनांचगोपानांविजितेंद्रियः देवकीपरमानंद। मंत्रंध्यायन्सुरवासनी। रात्रिपूजाविधिं



वल्लवेरुक्मिणीवल्लभस्यच॥ अभीष्टकल्पवृक्षस्यसर्वपुष्पफलस्यवा॥ रत्नमंडपमध्यस्थं। दिव्यपीतांबरंहरिं॥ दिव्यचंदनलिप्तांगं दिव्याभरणभूषितं। अनेकदिव्यमालाभिर्मंडितंपंकजेक्षणं। रत्नमंडलमध्यस्थं सुंदरंसुरवंदितं। शोभयंतंस्ववपुषा। सर्वलोकान्निजश्रिया। गोपीजनानांहृदयावल्लभंप्रोक्तंवर्चसा॥ सुगंधिपुष्पैराराध्य श्रीकृष्णंसर्वनायकं। राजतेतुपयःशुद्धंपक्वंपात्रेनिवेदयेत्। एकाग्र्यंमनसा॥ जपेन्मंत्रंसमाहितः। कामत्रयार्चनेचैवं सहस्रंसाष्टकंजपेत्। एषनित्यक्रमःप्रोक्तः कृष्णमंत्रस्यसूरिभिः॥ तत्रैवादौसंक्षिप्तविकालपूजोत्तरंतरम्। मनसावासमभ्यर्च्य॥ त्रिषुसंध्यासुसंयमी। प्रत्यहंतुजपेन्मंत्रमष्टोत्तरसहस्रकं॥ अशक्तोयजपेन्मंत्रं॥ नित्यमष्टशतंतथेति॥ अथनक्तं कृत्यानि॥ ततोयथासेप्रदायं॥ होमंनिष्पाद्यवल्लवः। गीतनृत्यादिकं भक्त्या॥ विज्ञायप्रार्थयेत्प्रभुं। तथोक्तं॥ बलीयसायदास्वामिन्पत्नीमवधारय॥ आगच्छशयनस्थाने। प्रियाभिःसहकेशवेति॥ एवंप्रार्थ्यसमर्थ्यांघ्रिं। पादुकेशयनालयं॥ आनीयदेवंतत्रानुपचारान्समाचरेत्। विशेषतोऽर्पयेत्तत्र मधुदुग्धंसशर्करं। तांबूलंवसकर्पूर

रादिव्यमाल्यानुलेपनैरित्येनंतयासमाराध्यासंगवंतंस्वकितःतत्प्रीत्यैसर्वकर्माणितत्फ
लंचार्पयेत्कृ॥ अथअहोरात्रिकैकर्म्मार्य्यणविधिः॥ एकादशस्कंधे॥ कायेनवाचा
मनसेंद्रियैर्वा॥ बुद्ध्यात्मनावानुसृतस्वभावात्॥ करोतियद्यत्सकलंपरस्मै॥ नारायणायेति
समर्पयेत्तत्॥ किंवान्यत्र॥ साधुवासाधुवाकर्म्मयद्वादाचरितंमया॥ तत्सर्वंनगवद्वि
ज्ञो॥ गृहाणाराधनंपरं॥ किंवा॥ अपांसमीपंशयनाशने॥ गृहेदिवारात्रौवयथावगच्छ
ता॥ यदस्तिकिंचित्सुकृतंकृतंमया॥ जनार्दनस्तेनकृतेनतुष्यतु॥ अथविधिर्घोषवारान
आगमे॥ आसनस्वागतेसार्घ्यपाद्यमाचमनीयकं॥ मधुपर्कीचमस्नानवसनाभरणानि
वसुगंधसुमनोधूप॥ दीपनैवेद्यवंदने॥ प्रयोज्येदर्चनायासुपचारीस्मृषोडश॥ अर्घ्यपा
द्याचमनं॥ मधुपर्कीचमाभ्यर्चागंधादयोनैवेद्यांनाउपचारादशक्रमात्गंधाद्याभिनिवेद्यो
तेःप्रजापैवोपचारिकी॥ सपर्य्यासिविधाःप्रोक्तास्तासामेकांसमाचरेत्॥ क्वचिद्वा॥ आसना
वाहनंदेवपाद्यार्घ्याचमनीयकं॥ स्नानंवस्त्रोभूषणंवागंधपुष्पंचधूपनं॥ प्रदीपश्चैवनै
वेद्यंपुष्पांजलिस्ततःपरं॥ प्रदक्षिणंनमस्कारोविसर्गश्चैवषोडशेति॥ केचिच्चाऽऽह्य

तुःषष्टिसुचंपचारान्महार्चने॥ नैघनेकप्रकारेषुप्रकारेकोत्रलिख्यते॥ सुरवंसुस्नस्यकस्य
स्यप्रातरादौप्रबोधनं॥ वेधादेवेणवीणादिवाद्यैर्वादित्तवरपि॥ जयशब्दा॥३॥ नम
स्कारा॥३॥ मंगलारात्रिकंततः॥ आसने॥५॥ दंतकाष्ठंवा॥६॥ पाद्यं॥७॥ अर्घ्यं॥८॥ वस्त्रा
न्पपि॥९॥ ततश्चमधुपर्कीद्याचमनं॥१०॥ पादुकापर्णं॥११॥ श्रृंगमार्जनं॥१२॥ मर्म्यगो॥१३॥
हर्त्तनं॥१४॥ स्नापनंजलेः॥१५॥ क्षीरेण॥१६॥ दध्ना॥१७॥ हविषा॥१८॥ मधुना॥१९॥ सित
यातया॥२०॥ मंत्रपूतेनपुनर्वीर्नि॥२१॥ रंगवासे॥२२॥ थवाससी॥२३॥ उपवीतं॥२४॥ पुनश्च
चमनीयं॥२५॥ चानुलेपनं॥२६॥ भूषणं॥२७॥ कुसुमं॥२८॥ क्षूणं॥२९॥ दीपो॥३०॥ दृष्ट्व
पसारणं॥३१॥ नैवेद्यं॥३२॥ सुरवासत्वा॥३३॥ तांबूलं॥३४॥ शयनोत्तमं॥३५॥ केशप्रसा
धनं॥३६॥ दिव्यवस्त्राणि॥३७॥ मुकुटंमहत्॥३८॥ दिव्यगंधानुलेपश्च॥३९॥ कोस्तुभा
दिभूषणं॥४०॥ विचित्रदिव्यपुष्पाणि॥४१॥ मंगलारात्रिकंततः॥४२॥ आदर्शः॥४३॥
मनोत्सवः॥४४॥ सिंहासनोपवेशश्च॥४५॥ पाद्यार्घ्यैःपुनरर्चनं॥४६॥ पुनर्धूपाद्यर्घ्यणेनु
प्राग्वन्नैवेद्यमुत्तमं॥४७॥ ततस्त्वद्यितांवूलंमहानीराजनंपुनः॥४८॥ चामरव्यजनंछत्रं
॥४९॥ गीतं॥५०॥ वाद्यंच॥५१॥ नर्तनं॥५२॥ प्रदक्षिणा॥५३॥ नमस्कारः॥५४॥ स्तुतिश्च

वरर्णत्रयोः॥५५॥तयोश्चस्थापनंमूर्द्ध्नि॥५६॥तीर्थनिर्म्माल्यधारणं॥५७॥उच्छिष्टभोजनं॥५८॥पा
दसंवाहनोपवेशने॥५९॥नक्तंशय्याविनिर्माणंदिवैर्विधिसाधनैः॥६०॥रत्नप्रदानं॥६१॥श
यनस्थानागममहोत्सवः॥६२॥शय्योपवेशनंश्रीमत्यारत्नालनपूर्वकंगंधप्रसूनतांबूलार्पण
।नीराजनोत्सवः॥६३॥शेषपर्य्यंकशयनपादसंवाहनादिकं॥६४॥क्रमेणैतेषुतुःषष्टिरुपचाराः
प्रकीर्त्तिताः॥सद्वाचारानुसारेण॥यद्यदाचर्यतेत्त्वर्थंनित्यकर्म्मादिकंतत्तच्छीकृष्णस्यापिकारयेत्॥
अतोत्रालिखितंयद्युदुपचारादिकंपरं॥सर्वंतत्तज्जानीयाल्लोककरीत्यनुसारतः॥अर्काणांचोपचरा
णमभावेभगवान्मतः॥भक्तेनार्च्यंयथालब्धैस्तैरंतर्भावितैरपि॥अथालब्धसमाधानं॥तत्रे॥उ
पचारोक्तवस्तूनामुपसंग्रहणेविधिः॥इत्याणामप्यभावेतुपुष्पाक्षतयवैःक्रियाः॥आर्चोपचा
रवस्तूनामभावेसमुपस्थिते॥निमित्तेनोदकेनैवद्रव्यसंपूर्णनाभवेत्॥उपचारेषुद्रव्येषुयत्किंचि
त्दुष्करंवुधः॥तत्सर्वंमनसाबुद्ध्यापुष्पत्तेयेणकल्पयेत्॥एतेषूपचारेषुवित्तशाठ्यंविवर्जितं
॥यदर्पणमेतेषांमनसातुप्रकल्पये॥अथशयनं॥रामरंभेदहनमत्तेवैनतेयंसुकोदरी॥शय
नेयःस्मरेन्नित्यंदुःस्वप्नंतस्यनश्यति॥अपिवास्कांदयाग्र्यया॥अतुकालानिगामीयःस्व
दारनिरतश्चयः॥ससदाब्रह्मचारीहविज्ञेयःसगृहाश्रमी॥अतुःस्वोउशयाभिन्यश्चतस्रस्तासुग

हिताःपुत्रास्तासुपियुग्मास्तुअयुग्माःकान्यकास्मृताः॥त्यक्त्वाचंद्रमसंदृष्ट्वामध्यंमूलंविहायवा
शुचिःसन्निविशेत्पत्नीपुत्रामर्द्धविशेषतः॥ऋविःपुत्रंप्रस्तूयेत॥पुरुषार्थप्रसाधकं॥श्रीविष्णुपुरा
णेजर्वसगरसंवादे॥कृतपादादिशौचश्चभुक्त्वासायंतनोगृही॥गच्छेच्छय्यामस्फुटितामकदा
रुमयींनृप॥नाविशालांनवेभग्नांनासमांमलिनांनच॥नचजंतुमयींशय्यामधितिष्ठेदनास्तृतां
॥प्राच्यांदिशिशिरःशस्तेथामथवानृप॥सदैवस्वपतःपुंसोविपरीततुरोगदं॥अतादृपमःस्व
स्तःस्वपत्न्यामवनीपते॥पुत्रामर्द्धेषुनेकालेज्येष्टपुंमासुराशिषु॥नास्नानोतुस्त्रियंगच्छे॥
चातुर्वर्नरजस्वलां॥नानिष्ठांनप्रकुपितांनाप्रशस्तांनगर्विणीं॥नादक्षिणांनान्यकामांनाकां
मांनान्ययोषितं॥कृत्वामामितिमंत्रंवास्वयंवेभिगुणैर्युतः॥स्नानःसुगन्धधृक्प्रीतो
नाक्षतःक्रुधितोपिवासकामःसानुरागश्चव्यवायंपुरुषोव्रजेत्॥चतुर्दश्यष्टमीचैव॥
अमावास्याथपूर्णिमापर्वाण्येतानिराजेंद्र॥रविसंक्रांतिरेवच॥तैलस्त्रीमांससंभोगी॥पर्व
स्वेतेषुवैपुमान्॥विण्मूत्रभोजनंनामप्रयातिनरकंततः॥नान्ययोनवयानोवानोपयुंक्तोषध
स्तथा॥देवद्विजगुरूणांचाव्यवायीनाश्रयीभवेत्॥चैत्यचत्वरतीर्थेषुनैवगोष्ठेचतुष्पथे॥नो
दग्मशानोपवनेसलिलेषुभक्षीयते॥प्रोक्तपर्वस्वशेषेषुनैवमूत्रात्सधार्यते॥गच्छेद्यदा

र्यमतिमान्नमूत्रोच्चारपीडितः॥परदारान्नगच्छेत्॥परदारान्नगच्छेन्मनसापिकदाचन॥विदुषो
वास्थिवधोयि॥नास्तितेषुव्यवायिनः॥मृतोनरकमभ्येति॥हीयतेचात्रवायुषः॥परदारागतिःपुं
सांसुभगत्वापिभीतिदा॥इतिमत्वास्वदारेषु॥ऋतुमत्सुबुधोव्रजेत्॥यथोक्तदोषहीनेषुस्वकाम
वन्तावपीति॥एषांभक्तयुपयोगित्वं॥नस्याद्यद्यपिकर्मणां॥तथापिकृतज्ञत्वेन॥गृहीषु
वश्यकल्पत्वं॥इत्थंहिप्रातरुत्थानात्प्रत्यहंशयनावधि॥॥इतिश्रीशौर्यधैर्यगांभीर्यादीर्यौ
नेकगुणसंपन्नमहताश्रीहरिदासतत्पुत्रमहताश्रीसुंदरदाससंग्रहीतेकोवोजप्रकाशेश्री
भगवद्भक्तिर्नामद्वादशोदंडः॥॥१७

महापातकजान्घोरान्नरकान्प्राप्यदारुणान्॥कर्मदायात्रजायंतेमहापातकिनस्तु
हा॥अथयाज्ञवल्क्यसुस्मृतौ॥मृगस्वश्वकरोष्ट्राणां॥ब्रह्महायोनिमृच्छति॥खरश्वकसंवे
नानांसुरापानात्रसंशयः॥कृमिकीटपतंगत्वंस्वर्णहारीसमाप्नुयात्॥तृणगुल्मलतात्वं
वक्रमशोगुरुतल्पगः॥मृगाहाहिंसादयः॥श्वसूकरोष्ट्राःप्रसिद्धाः॥तेषांयोनिंब्रह्महास्वकर्म
शेषेणप्राप्नोति॥खरोरासभःपुक्कसःप्रतिलोमनिषादेनशूद्र्यांजातः॥वैदेहकेनांवद्र्यांजातो
वेनः॥तेषांयोनिषुसुरायःप्राप्नोति॥कृमयःसजातीयसंभोगनिरयेहिमांसविष्ठागोम
यादिजन्यास्तेतःकिंचित्स्थूलतराःपक्षास्थिरहिताःसजातीयसंभोगरहिताःपिपी
लिकादयःकीटाःपतंगाःसैलभ्रःतेषांयोनिंब्रह्मघ्नस्वर्णहारीप्राप्नुयात्॥ब्रह्महाक्षय
रोगीत्यात्सुरायःश्यावदंतकःहेमहारी-कुरुरवीडुश्वमांसयुरुतल्पगःयोयेनसंवसत्ये
षांसतल्लिंगोभिजायते॥दियोनिषुदहरुणैर्दुःखमनुभूयानंतरंहरितश्वेषेणजननसमय
एवक्षयरोगादिलक्षणयुक्तैःदुःखप्रचुरेषुमानुषशरीरेषुसंसरति॥तत्रब्रह्महाक्षयरोगी
राजयक्ष्मीभवेत्॥अन्नहर्तामियावीस्यान्मूकोवागपहारकः॥धान्यमिश्रातिरिक्तोगृं
ध्रिम्रुनःपूतिनासिकः॥तैलहर्तातैलपायीस्यात्पूतिवक्त्रस्तुसूचकः॥एतद्वै

एतच्च तिर्यक्प्राप्तेरन्तरकालेमानुषशरीरप्राप्तौद्रष्टव्यं।यद्वातद्वापरद्रव्यमपहृत्यबलान्नरः
।अवश्यंयातितिर्यक्त्वंजग्ध्वाचैवाहुतंहविःइतिमनुस्मरणात्।।किंच।। परस्वयोषितं
हृत्वाब्रह्मस्वमपहृत्यचाअरण्येनिर्जनेदेशेभवतिब्रह्मराक्षसः।हीनजातौहेमक
र्त्र्यांपक्षिजातौपररत्नापहारकः।तथाचमनुः।मणिमुक्ताप्रवाल्यादिःनिहृत्वा
लोभेनमानवः।विविधानिवरत्नानिजायतेहेमकर्तरि।तितथा।पत्रात्मकंशान्नहृ
त्वामयूरःशुभान्गंधान्नूपहृत्वाछुछुंदरीराजदुहितारव्यामूषिकाजायते।।मूषक
धान्यहारीस्यात्।धानमुष्टिःकलेकपिः।जलंस्रवःपयःकाकोगृहकारीतुपक्व
रामक्वदंशःपलंगृध्रोगांगोधाग्रेप्रवकस्तथा।श्वित्रीवस्त्रंश्वारसंकुंभीरीलवणहा
रकः।प्रदर्शनार्थमेतन्मयोक्तंस्तेयकर्मणि।इत्यप्रकाराहियथातथैवप्राणिजा
तयः।शंखेनकविद्विशेषोदर्शितःब्रह्महाकुष्ठीतेजसापहारीमंडली।देवब्रा
ह्मणकोशाकःखलतिर्जन्मगरहासिदाचुन्मत्तोगुरुप्रहर्त्तेतापस्मारीगोघ्नश्च
धान्यमषीमुक्ताश्चान्यत्रप्रहर्त्तेशष्टवधाप्राणिविशेषः।कुंडाशीभग्नभ्रातृदेवब्रा
ह्मणस्त्रीपतिरपहारीयोदुरोदरीन्यासापहारीचकाणःस्त्रीपण्यापजीवीवृषलःकौमारहार

त्यागीदुर्भगोभिक्षैकाशीवातगुल्मीश्वब्रह्मभ्रूणहाकोमंडमालीब्राह्मणीगामीनिर्वीजीक्रूरकर्मावमनोवस्त्रापहा
रीपतंगःशय्यापहारीक्षपणकःईश्वरश्चुक्षुपहारीकपालीदीपापहारीकोशीकोमित्रध्रुक्कृमयीमा
तापित्रोश्चक्रोशकःखंडःकारश्चितिःकार्यामुखविर्गंधिःपर्युषितभोजीकृमिःअदत्तादायिवल्मीकदीम
त्सरीभ्रमरोअग्रहाहामंडलकुष्ठीशूद्राचार्यःश्वपाकःगोहर्त्तासर्पःस्नेहापहारीक्षयीश्व
त्रापहारीअजीर्णाज्ञानाहारीमूककुंडाशीपुष्कसीगमतेअजगरःप्रव्रजितागमरुपिशाचःश्व
द्वागमनेदीर्घकीटःसर्वेणीसिगामीहरिद्रोजलहारीमत्स्यःक्षीरहारीबलाकोवार्द्धुषिकोश्वंगही
नःअविकेयविक्रयीगद्रोराजमहिषीगामीनपुंसकोराजाकोशकोगर्दभोगोगामीमंडको
अनध्यायाध्ययनेश्वगालःपरद्रव्यापहारीपरप्रेष्योमत्स्यवाधेगर्भवासीद्येतेअन्तर्द्धगमना
इतिायथाकर्मफलंप्राप्यतिर्यक्कालपर्ययात्।जायंतेलक्षणभ्रष्टाःदरिद्राःपुरुषाधमाःततो
निःकल्मषीभूताःकुलेमहतिभोगिनःजायंतेविद्ययोपेताधनधान्यसमन्विताःततो दुर्ल
क्षणमनुष्यजन्मानंतरंनिःकल्मषीभूतानरकभोगद्वारेणक्षीणपापाःप्राग्भवीयसुकृत
शेषेणमहाकुलेभोगसंपन्नाश्चधनधान्यसंपन्नाजायंते।।विहितस्याननुष्ठानान्निंदितस्यस
वनात्।अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छति।तस्मात्तेनेहकर्त्तव्यंप्रायश्चित्तंविशुद्धये

॥ प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः अपश्चात्तापिनः कष्टं निरयं यांति दारुणं प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्य वचनादिह जायते॥ यः कामतो महापापं नरः कुर्यात्कथंचन। नतस्यातिः कृतिर्दृष्टाभ्यग्वह्निपतेनादृतशीतिः। तथाहि। विहितं यद्कामानां कामानां कामात्तु हि गुणं भवेदिति चकामकृतेपि प्रायश्चित्तदर्शनात्। अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः। कामकारकृतेप्याहुरेके श्रुतिनिदर्शनादिति। तदपि ब्रह्महा पद्यपस्तेन स्तथैवगुरुतल्पगः। एते महापातकिनो यश्चैतैः सहसंविशेत्। वह्नामक कार्याणां सर्वेषां शस्त्रधारिणां यद्येकोधात्यये त्तत्र सर्वेतेवैतकास्मृताइति तथाप्रयोजकादीनामप्यापस्तंबेन फलसंबंधउक्तः प्रयोजयिताऽनुमंताकर्त्ता चेतिस्वर्गनरकफलेषुकर्मसुभागिनो यो भृत्यआरभतेतस्मिन्फलविशेषहृतितत्राप्रवृत्तस्यप्रवर्त्तकः। प्रयोजकः सचत्रिप्रकारः आज्ञापयिताऽभ्यर्थयस्मनउपदेष्टेति तत्राज्ञापयिता नामस्वयमुद्यतः सन्नौवैभृत्यादिकं यः प्रेषयतितिमदीयमामित्रंजहीतिसउच्यते। अभ्यर्थयमानस्तुयः स्वयमसमर्थः प्रार्थनादिनामछद्मनाव्यापादयेत्परंप्रवर्त्तयतिसोभिधीयते। अनयोश्चस्वार्थेसिद्ध्यर्थमेवप्रयोक्तृत्वं उपदेष्टृत्वेपुनर्त्वंशत्रुमित्यंव्यापादयतिमर्माघातनाद्यपदेशपुरःसरंप्रेरयन्कथ्यः। तत्र

प्रयोज्यगतमेवफलमितितेषांभेदः। अनुमंतानुप्रवृत्तस्यप्रवर्त्तकः सचद्विप्रकारः कश्चित्स्वार्थसिद्ध्यर्थमनुजानातिकश्चित्परार्थमिति। नत्वनुमतस्यकथंहिंसाहेतुर्त्वनताकप्राणवियोगात्सदनेन तस्यसाक्षात्कारिव्यापारजन्यत्वंन्नापिप्रयोजकस्येवसाक्षात्कर्तृप्रवृत्त्युत्पादनेद्वारेणप्रदीपस्य प्रवर्त्तकत्वात्तत्रचसाकल्पतयाव्यवसितमिति॥ प्रवृत्तमेवानुमन्यतइतिशेकुनीयं। नह्यस्यानुमतनस्यहिंसाप्रत्यहेतुत्वाद्यर्थत्वाच्चउच्यते। यत्रचराजादिपारतंत्र्यात्तत्स्वयमनसाप्रवृत्तितोपिप्रवृत्तिविच्छेदभयाद्वाशिथिलप्रयत्नोराजाद्यनुमतिमपेक्ष्यते॥ तत्रानुमतिर्हेतुःप्रवृत्तिमुपोद्वलयंतीतिहिंसाफलंप्रतिहेतुतोप्रतिपद्यते। तथायोपिताऽनधनापहारादिनापरानर्थं पयतिसोऽहेपिहेतुर्भूतमन्यत्पादनद्वारेणहिंसाहेतुर्भवति। अतएवविलुनीकं आकुष्टस्ताडितोवापिधनेर्वापिवियोजितः। यमुद्दिश्यजनेत्प्राणान्नतमाहुर्ब्रह्मघातिनं। तथाज्ञातिमित्रकलत्रार्थंस्वहृत्त्रार्थमेववायमुद्दिश्यपत्यजेत्प्राणान्नतमाहुर्ब्रह्मघातिनं। नचहंतेषथाकोशनादिषुकस्यचिन्मन्युत्पत्तिदर्शनात्कारणंतिशंकनीयं। पुरुषस्वभावैर्विचित्र्यात्तथोत्पत्तेरणिमित्तेनजोतमन्यवोभवंतिते स्वयंनिचारितानाकारणंतएषांचानुग्रह

कप्रयोजकादीनांप्रत्यासत्तियवधानापेक्षयाव्यापारगतांगुरुलाघवापेक्षयास्वफलगुरुलाघववत्
तत्प्रायश्चित्तगुरुलाघववोद्रव्यांयोयोभूयआरभतेतस्मिन्फलविशेषश्रुतिवचनात्तथाह्य
नुग्राहकस्यतावत्स्वयमेवहिंसायांप्रवृत्तत्वेनतत्त्वानंवकयत्नमन्यनिमित्तात्क्रोशनादिकमु
कुर्वतोपिनामग्रहीत्वोन्मादादिनात्मानंव्यापादयतितत्रापिनदोषः।अकारणंतुयःकश्चि
द्विजःप्राणान्परित्यजेत्तत्स्पेवतत्रदोषःस्यान्नतुयत्परिकीर्त्तयेदित्यस्मरणात्तथायत्राक्रोश
कादिजनितमन्युरात्मानंखड्गादिनाप्रवृत्यमरणादृते।क्रोशनाधिक्षेपबंधनहननादिनासंतोषि
तोयदिजनस्समक्षमुच्चैः श्रावयतिनाक्रोशकस्यापराधश्रुतितत्रापिवचनान्नदोषः।यथारुद्रः
उद्दिश्यकुपितोस्त्रानोद्यितःश्रावयेत्पुनःतस्मिन्मृतेनदोषोस्तिह्यारुद्धारणेकृतइतिएते
षांप्रयोजकादीनांदोषगुरुलघुभावपर्यालोचनयाप्रायश्चित्तविशेषंवक्ष्यामः।ब्रह्मरुद्धा
समान्याह।गुरूणामध्यविद्वांसोवेदनिंदासुहृद्वधः।ब्रह्महत्यासमंज्ञेयंअधीतस्यवचनाज्ञान
मितिगुरूणामोधिक्येनाधिक्यंपरः।अन्यतामिसेसमंगुरोरन्यतामिश्रंसनामितिमहापातकंसमानी
तिगौतमस्मरणात्एतच्चेलाकविदितदोषाभिशंसनविषयंदोषंसुध्यानपूर्वंपरेषांसमारब्धा

नास्यादित्यापस्तंबस्मरणात्नास्तिक्याभिनिवेशनवेदकुत्सनंसुहृन्मित्रंतस्याब्राह्मणस्यापिवधः
।अधीतस्यवेदस्यासछास्त्रविनोदेनात्मनश्चनिषिद्धभक्षणंजेह्मंतुत्कर्षचवक्ष्यतीतिरजस्वला
मुखास्वादंसुरापानसमानितुअश्वरत्नमनुष्यस्त्रीभूमिधनहरणंतथा।निक्षेपस्यचसंवीहिसुव
र्णस्तेयसमितिसखिभार्याकुमारीषुस्नुषायांनिषंत्यजादिषुसगोत्रासप्तमस्त्रीषुगुरुतल्पसमंस्मृत
।गोवधाव्रात्यतास्तेयमृणानांचानपक्रियाअनाहिताग्नितापण्यविक्रयःपरिवेदनंभृतादध्य
यनादानेभृतकाध्यापनंतथापारदार्य्यंपरिवित्तिताईधलक्षणक्रियास्त्रीशूद्रविट्क्षत्रियव
धोनिंदितार्थोपजीवनंनास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयःधान्यकुप्यपशुस्तेयमया
ज्यानांचयाजनंपितृमातृसुतत्यागस्तडागारामविक्रयःहीनदक्षिणयाजित्वंकन्याविक्रयणंत
थाकन्यासंदूषणंचैवपरिवित्तिदकन्याजनंकन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनंआत्मनोर्थेक्रि
यारंभोमद्यपास्त्रीनिषेवनंस्वाध्यायाग्निभृतत्यागोबांधवत्यागएवचवृथानार्थकुमक्षदःस्त्रीहिं
सौषधिहिंजीवनंहिंस्रयंत्रविधानंचवक्ष्यतेनार्योत्मविक्रयःअशुद्धेभ्योहीनसरत्नहीनयानि
निषेवनंतथैवाश्रमेवासःपरान्नपरिपुष्टताअसच्छास्त्राधिगमनमाकरेष्वधिकारता

नार्यायाविक्रयश्चेषामेकैकमुपपातकं॥शिरःकपाली ध्वजवान्भिक्षाशी कर्मवेदयन्ब्रह्महाव्रतम्॥
ह्यानिमित्तंभुक्तशुद्धिमाप्नुयात्। ब्रह्महाव्रतम्॥ह्यानिकृच्छ्रंकृत्वावनंवसेत्क्षतिमनुस्मरणात्ग्राम
समीपादेवाक्षेत्रतवापनोवानिवसेद्ग्रामांतेगोव्रजेषिवा॥आश्रमेवृक्षमूलेवासर्वभूतहितेरतः
तितंनेवोक्त्वात्क्षेत्रवापनोवेतिविकल्पान्निधानाज्जटीवेतिगम्यते॥अतएवसंवत्सरंब्रह्महाव्रतम्
ह्यानिवाल्लवासाजटीध्वजीतितथाभिक्षाशनशीलश्चभवेत्॥भिक्षावलोहितकेनमृन्मयखंडमा
रावेणग्राह्या॥तोहितकेनखंडसरावेणग्रामंभिक्षार्थंप्रविशेदित्यापस्तंबस्मरणात्॥सप्तागाराएषं
वमृष्टंलभ्यतेतत्रतावत्येवमसंकल्पितानिभिक्षार्थंप्रविशेति॥सप्तागाराएषंसंकल्पितानिवरैर्द्रव्यं
मितिवशिष्ठस्मरणात्॥तथैककालएवसाग्राह्या॥एककालाहारइतिनेवोक्त्वात्॥तत्रनेत्यंब्रा
ह्मणादिवर्णेष्वेवग्राह्यंचातुवर्ण्येक्षेत्रेत्यरण्यंगीसंयतःपुमानितिसंवर्तस्मरणात्॥त
थाकर्मब्रह्महास्मीतिख्यापयन्द्वारिस्थितोभिक्षांयाचेत्॥वेश्मनाहारितिष्ठन्भिक्षार्थीब्रह्मघात
कइतिज्ञातातपस्मरणात्॥अथंभिक्षाशीलनियमोवत्पेजीवनाशकोद्रष्टव्यःभिक्षायेप्रविशेद्ग्रामं
वन्येर्थेदिवनजीवनीतिसंवर्तस्मरणात्॥तथाब्रह्मचर्यादियुक्तेनचभवितव्यंरवद्वागपाणिर्द्वा
दशसंवत्सरात्ब्रह्मचारीभिक्षायेग्रामेप्रविशेत्कर्मनिर्हालनेः॥महापातकजानघोरान्नरकान्

ग्राप्यदारुणान्॥कर्मक्षयात्प्रजायतेमहापातकिनस्त्विह॥१॥मृगश्वसूकरोष्ट्राणांब्रह्महायोनिमृच्छ
तिखरपुल्कसवेनानांसुरायोनावसंशयः॥२॥कृमिकीटपतंगत्वंस्वर्णहारीसमाप्नुयात्तत्र॥गु
ल्मलतावंवकृमशीगुरुतल्पगः॥३॥ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदंतकः॥हेमहारी
चकुनखीदुश्चर्मागुरुतल्पगः॥४॥योयेनसंव्रतेनैषांसतद्भिगोभिजायते॥अन्नहर्त्तामयांवास्या
त्मूकोवागयहारकः॥क्षन्यमित्रोतिरिक्तांगःपिशुनःपूतिनासिकः॥तेलहृत्तैलपायीस्यात्पूतिव
क्त्रस्तुसूचकः॥५॥यस्यस्त्रियंहत्वाक्षेत्रलब्धमपहृत्यवा॥अरण्येनिर्जनेदेशेभवतिब्रह्मरा
क्षसः॥६॥हीनजातौप्रजायतेब्राह्मणहारकः॥पत्रशाकंशिरवीहृत्वागंधांछुंछुंदरिस्तथा॥७॥मूषको
धान्यहारीस्याद्यानभुष्टःफलंकपिः॥जलंक्षत्रवधात्काकोगुरुकारीहकपक्षकः॥लाक्षमधुदंशःपलंगृ
ध्रोगांगोधाःशिंवकस्तथा॥श्वित्रीवस्त्रस्यारसंतुवीरीलवणहारकः॥८॥प्रदर्शनार्थमेतत्तुमयो
क्तंतेषुकर्मसुहिद्यप्रकाशाहियथातथ्यंवप्राणिनांनयः॥९॥यथाकर्मफलंप्राप्यतिर्यक्कां
तपर्यायाज्जायंतेलक्षणभ्रष्टादरिद्राःपुरुषाधमाः॥१०॥ततोपिकल्मषीभूताःकुलेमहति
भोगिनः॥जायंतेविद्ययोपेताधनधान्यसमन्विताः॥११॥विहितस्याननुष्ठानान्निंदितस्य
प्रसेवनात्॥अनिग्रहाच्चेंद्रियाणांनरःपतनमिछति॥१२॥तस्मात्तेनेहकर्त्तव्यंप्रायश्चित्तंविशु

द्वयोएवमस्यांतरात्मावलोकश्चेवप्रसिध्यति॥१४॥प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत्कामतो
व्यवहायाश्चवचनाद्दिहजायते॥१५॥प्रायश्चित्तमकुर्वाणाःपापेषुनिरतानराः।अपश्चात्तापिनःक
ष्टान्नरकान्योतिदारुणान्॥१६॥तामिस्रंलोहशंकुंचमहानिरयशाल्मली।रौरवंकुड्मलंपू
तिमृत्तिकंकालसूत्रकं॥१७॥अवीचीमंधतामिस्रंकुंभीपाकंतथैववा।असिपत्रवनंचैवतायनंचैक
विंशकं॥१८॥संधातंलोहितोदंचसविषंसंप्रतापनंमहानिरयकाकोलंसंजीवनंमहारौद्रं(महापा
तकंजैर्धारुपपातकंजेस्तथा।अविताद्यात्यवारीतप्रायश्चित्तानराधमाः॥ब्रह्महामद्यपस्तेनस्त
थैवगुरुतल्पगःएतेमहापातकिनोयस्तुतैःसहसंवसेत्॥२०॥गुरूणांमध्यपित्रोर्वेदनिंदासुहृद्व
धेः।ब्रह्महत्यासमंज्ञेयंअधीतस्यवनाशनं॥निषिद्धभक्षणंजैह्म्यंमुत्कर्षंवचवोन्नतेरजस्वलामु
खाश्वादोरहःसुरापानसमानितु॥अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंतथा।निक्षेपस्यचसर्वंहि
सुवर्णस्तेयसंमितं॥सखिभार्याकुमारीषुस्वयोनिष्वत्यजासुवासगोत्रासुसुतस्त्रीषुगुरुतल्प
समंस्मृतं॥पितुःस्वसारंमातुश्चमातुलानींस्नुषामपिमातुःसपत्नींभगिनीमाचार्यतनयांतथा।
आचार्यपत्नींस्वसुतांगंछंस्तुगुतल्पगः॥छेत्त्वालिंगंवध्यस्तस्यसकासायास्त्रियाश्रपि॥गोवधो
व्रात्यतास्तेयमृणानांचातपक्रिया।अनाहिताग्नितापएवविक्रयःपरिवेदने॥मृताद्ध्ययनाद्या

नेरतकाध्यायनंतथापारदार्थेपारिवित्यंवार्द्धुष्यंलवणक्रिया॥स्त्रीशूद्रविट्क्षत्रवधोनिंदि
तार्थोपजीवनं।नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः॥३०॥धान्यकुप्यपशुस्तेयःमद्याज्ञा
नाद्वयोजनंपितृमातृसुतत्यागःतडागारामविक्रयः॥हीनदक्षिणयाजित्वंकमुविक्रयणंत
था।कन्यासंदूषणंचैवपरिविंदकद्याजनं।कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनं।आत्मनो
र्थेक्रियारंभोमद्यस्त्रीनिषेवणं।स्वध्यायाग्निसुतत्यागोबांधवत्यागएवच।इंधनार्थंद्रुमच्छेदःस्त्री
हिंसौषधजीवनं।हिंस्रयंत्रविधानंचव्यसनान्यात्मविक्रयः।शूद्रप्रेष्यहीनसरत्वंहीनयोनिनि
षेवणं॥तथैवानाश्रमेवासःपराञ्चपरिपुष्टता।असत्शास्त्रानिगमनेमाकरेषुक्रियारतिः
॥भार्यायाविक्रयश्चैषामेकैकेमुपपातकं।शिरःकपालेध्वजइत्याशौकर्मवेदयत्॥ब्रह्म
हाद्वादशाब्दानिनिर्मनुष्यंशुद्धिमाप्नुयात्।ब्राह्मणस्यरिक्तपाणेरगर्वाद्वादशकस्यच॥तथाशू
द्रेक्षवभक्षयित्वानाद्वाशुद्धिमाप्नुयात्।दीर्घतीव्रोभयग्रस्तेब्राह्मणेगामथापिवा॥दह्वाप
थिनिरातंकंकृत्वावाब्रह्महाशुचिः॥आनीयविप्रसर्वस्वंहृतंधातितएववा॥तद्विमित्तेक्षतःश
स्त्रैर्जीववधेविशुध्यति॥लोमभ्यास्त्वाहेत्येवेहिलोमप्रभृतिवेतनुं।मज्जोक्तंजुहुयाद्धाप्ये
नैरेभिर्यथाक्रमं॥संग्रामेवाहितोलक्ष्यभूतःशुद्धिमवाप्नुयात्।मृतकल्पःग्रहारातैर्जी

प्रायश्चि
६

त्रपिविशुध्यति॥ अरण्येनियतोजघ्न्वोर्विसहितासुद्धेतवाभित्वाशित्वाप्रतिस्रोतःसरस्वतीं॥
संग्रामेवादतोलब्ध्वभूतःशुद्धिमवाप्नुयात्॥मृतकल्पःप्रहर्त्राजीवन्नपिविशुद्धतिगत्वेह्नत्रयंव
धतीवरेब्रह्महणिव्रतंगर्भहावयथावर्णितथात्रेयीतिसूदकः॥वरेद्वेतमहवापिवाताथंसमु
पागतः॥द्वियुणंसवनस्थेषुब्राह्मणेव्रतमादिशत्॥इतिब्रह्महत्याप्रा॥यश्चित्तप्रकरणं॥सु
रांबुद्धत्तगोमूत्रपयसामग्निसंनिभं॥सुरापोन्यतमंपीत्वारणात्तशुद्धिमिच्छति॥यालवासा
जटीवापिब्रह्महत्याव्रतंचरेत्॥पिण्याकंवाकणान्वापिभक्षयेत्त्रिःसमाहितः॥अज्ञानाद्यसु
रापीत्वारेतोविण्मूत्रमेववापुनःसंस्कारमर्हतित्रयोवार्णाद्विजातयः॥पतितोलोकर्नसायांति
ब्राह्मणीयासुरांपिवेत्॥इहैवस्वाशुनीगृध्रीशुनीगृध्रीशूकरीवोपजायते॥इतिसुरापानप्रा
यश्चित्तप्रकरणं॥ब्रह्मणस्वर्णहारीनुराज्ञेमुसत्यर्यये॥स्वकर्मख्यापयंस्तेनोहनेमु
क्तोपिवाशुचिः॥अग्निवैद्युतेपशुध्यतसुरापव्रतमाचरेत्॥आत्मतुल्येसुवर्णेवाद्यहा
प्रवृष्टिकृत्॥॥इतिसुवर्णस्तेयप्रायश्चित्तं॥तल्पेयःशयनेसार्द्धंमायस्यायोषितास्वपेज्ञाग्र
हीत्वात्कृत्यदृषणेनेत्रमर्त्यावोत्सृजेत्तनुं॥प्राजापत्येचरेत्कृच्छ्रंसमावायुरुतल्पगः॥वा
द्रायणंवात्रीन्मासान्त्रभ्यसेद्दंसंहितां॥॥इतिगुरुतल्पप्रायश्चित्तं॥ " "

प्रायश्चि

एभिस्तुर्यंवमेघोवैवर्त्मरंसोपितत्समः॥कन्यांसमुद्वहेद्देवांसोपवासामकिंचनां॥इतिसंसर्ग्रप्रायश्चि
त्तं॥चांद्रायणंचरेत्सर्वानवक्रष्टान्निहत्यनु॥श्रौताधिकारहीनेषुकालेनानेनशुध्यति॥इतिपंच
महापातकप्रायश्चित्तं॥मिथ्याभिसंशितोदोषोद्विःसमोभूतवादिनश्शस्यामानंचस्मादत्तेमृ
षावदन्॥पंचगव्येपिवद्गोघ्रीमासमासीतसंयतः॥गोष्ठेशयोगोनुगामीगोप्रदानेनशुध्यति
॥कृच्छ्रंचैवातिकृच्छ्रंचवरेद्वापिसमाहितः॥दद्यात्त्रिरात्रंचोपोष्यदक्षनेकादशागुणान्॥इतिगो
वधप्रायश्चित्तं॥उपपातकशुद्धिस्यादेवंचांद्रायणेनवा॥पयसावापिमासेनयावाकेनथवा
मुनेः॥दक्षनेकसहस्रागादद्याद्दक्षत्रवधेपुमान्॥ब्रह्महत्याव्रतंचापिवत्सरत्रितयंचरेत्॥
वेश्यहाद्वेवरेदत्तंदद्याद्वैकशतंगवां॥षण्मासान्त्रभ्यसेद्वापितत्॥दद्याद्विदुषेश्वथवाकुटु
म्बिनेब्रह्मवित्तंश्रुतिवित्प्रमाप्यतु॥इतिधातुर्वत्तमविक्रमाद्दद्याद्विशुद्धये॥अप्रदुष्टांस्त्रि
यंहत्वाशूद्रहत्वाव्रतंवरेत्॥अस्थिमतांसहस्रंतुतथानस्थिमतांमतः॥मार्जारगोधान
कुलमद्गुकश्वपतत्रिणः॥हत्वाक्रव्यादपिवेद्क्षीरंकृच्छ्रंवापादिकंचरेत्॥गजेनीलाश्वपेवशुके
त्सोद्विहोयेन॥खरोजमेषेषुदेयःकोवेविहायनः॥हंसश्येनकपिक्रव्याद्बलस्यलशिखंडिनः॥

मासंवहत्वादद्या ज्ञामक्त्वादश्ववासिकां॥अगोश्वायसोदंडः पंउकेउपुसीसकं।कोलेश्वतघरो
दयउष्ट्रगुंजा हदेशुकां॥तित्तिरोउतिलडोणंगजादीनामशकुवत्।दानंदातुंवरेइकृत्थं
एकेकस्यविशुद्धये॥फलपुष्पात्वरसजसत्वप्रातेद्यताशनं।किंचिन्माल्लुवधेदेवप्राणायामा
स्त्वनस्थिके॥दृत्तगुल्मलतावीरुछेदनेजप्यमृक्शनं।स्यादोषधिहथस्थिदेहीराशीगोनुगो
दिनं॥पुंश्चलीवानरखरैःदृष्ट्वाश्वाद्विवायसैः।प्राणायामंउलेकृत्वाहृतंप्राश्यविशुध्यति
॥यन्मेद्यरतश्चत्याभ्यांस्कन्नंरोतोभिमंचयेत्।तत्तनौतरंउदोमर्ध्यतेनानामिकयास्पृशेत्॥मयि
तेजइतिछायांस्वांदृष्ट्वाउगतोयपेत्।सावित्रीम्शुचौदृष्टेःवापल्पेवान्हृतेपिच॥अवकीर्णिभवे
ऊत्वाव्रतेचारीउपोषितं।गार्दभंपशुमानम्यनेऋतसविशुध्यतिभैक्षाग्निकार्यत्यकृत्वाउ
सप्तरात्रमनाउरः।कामावकीर्णिइत्याभ्याजुहुयादाहुतिद्वय॥उपस्कानंततःकुर्यात्समा
सिर्वस्तूनेनु।मधुमासीशनेकार्यःकृछ्रःशषव्रतानिउ॥प्रतिकूलंगुरोःकृत्वाप्रसाद्यंवोवि
शुध्यति।कृछ्रत्रयंगुरुःकुर्याद्रियतेग्रहितोयदि॥ओषधान्नमदानाद्येवर्ज्ययकमेःक्रिय
यमाणेयकारेउमृतेविप्रेःनपातकं।मिथ्याभिशंसिनोदोषोद्विःसमोमृतवादिनः॥मिथ्याभि
शस्तदोषंवसमाद्तेमृषावदन्॥महापापोमयाभ्योयेभिशंसेन्मसापरांव्रह्मोमासमासीतस

जापीनियतेंद्रियः॥अभिशस्तोमृषाकृछ्रंचरेद्यमेवचनिर्वपेत्पुरोडाशंवायव्यंपशुमेववा॥
अनियुक्तोभ्रातृभार्यांगछंश्चाद्रायणंचरेत्।त्रिरात्रंतेघृतंप्राश्यगत्वोदक्यांविशुध्यति॥त्री
न्कृछ्रान्चरेद्ब्राह्मत्ययाजकोभिचरन्नपि।वेदब्रह्मवीयवान्यक्त्वावशरणागतं॥गोष्ठे
वसन्व्रतंचरीमासमकंपयोव्रतः॥गायत्रीजाप्यनिरतःशुध्यतेऽसत्प्रतिग्रहान्॥प्राणायाम
ीजलस्नात्वाखरयानोष्ट्रयानकः॥नग्नस्नात्वाचमुत्कावागत्वाचेवदिवास्त्रियं॥ऊर्ध्वंकृत्व
हंकृत्वाविप्रेनिर्जिन्यवादतः।वाग्नावावाससाहित्वाप्रसाद्योपवसेद्दिनं॥विप्रदुष्टेद्यमेकृछ्रत्व
तिकृछ्रोनिपातने।कृछ्रातिकृछ्रोऽसृक्पातेतप्तकृछ्रोभ्यतरशोणिते॥दशोकालंवयःशक्तिंयापेत्वा
वेद्ययनतः प्रायश्चित्तंप्रकल्पेस्यात्तयत्रोक्तानिःकृत्ति॥रासीकुर्नवहिर्ग्रामात्तिनयेरश्व
वोधवाःपतितस्यवहिःकुर्युःसर्वकार्येषुवेवृतं॥स्वपितव्रतआयातेतिनयेस्त्रैरत्नवंधटं।जुगुप्सर
त्नवाप्येनंसवसेयुश्चसवज्ञः॥पतितानांमेषएवविधिःस्त्रीणांप्रकीर्तितः।वासोग्रहांतिकेदेय
यमन्नंवासःसरक्षणं।नीचाभिगमनंगसयातनंतद्वहिसनं।विशेषतनीयानिस्त्रीणामेतान्य
पिक्रमं॥शरणागतवालस्त्रीहिंसकारसंवसेन्नतु।वीरव्रतानपिसतःकृतप्रसहितानिमान्॥ध
र्षयवर्जितेज्ञातिमध्यस्थोयवसंगवोप्रदद्यान्प्रथमेगोभिःसक्रियस्याहिसक्रिया॥विख्यातदोषः

कुर्वीतपर्षादानुमतंव्रतंआविख्यातदोषस्तुरहस्यंव्रतमाचरेत्॥त्रिरात्रोपोषितोजप्त्वाव्रतमहा
त्वधमर्षणं॥अंतर्जलेविशुध्येतगादत्वाचपयस्विनी॥त्वोमम्यःत्वाहेत्यथवादिवसमारुताश
नः॥जलेस्थित्वाभिजुहुयाद्वत्वारिंशदृचंहुतीः॥त्रिरात्रोपोषितोकृत्वाकूष्मांडैर्घृतंशुचिः
॥सुरापःस्वर्णहारीवरुद्रजापीजलस्थितः॥सहस्रशीर्षजापीवामुच्यतेगुरुतल्पगः॥गोदैयाकर्म
णास्यांतेपृथगग्निःपयस्विनी॥प्राणायामशतंकार्यसर्वपापापनुत्तये॥तथाचउपपापानासर्व
षामनादिष्टस्यचैवहि॥ओंकाराभिहुतंसोमसलिलंपावनंपिबेत्॥कृत्वाऊर्ध्वोविण्मूत्रप्राश
नंहिद्विजोत्तमः॥निशायांवादिवावापियदज्ञानकृतंभवेत्॥त्रैकाल्यंसंध्याकरणात्ततत्सर्व
विप्रणश्यति॥मुक्तिकारणकंजप्यंगायत्र्याश्चविशेषतः॥सर्वपापहरांश्रेष्ठेरुद्रैकादर्शनीतथा
॥यत्रयत्रवसकीर्णमात्मानंमन्यतेद्विजः॥तत्रतत्रत्रिरभ्यस्यात्रिभिर्मासैर्विशुध्यति॥विद्याभ्यासस
तंह्येतंमहायज्ञक्रियापरं॥तस्पृशंतीहपापानिमहापातकजान्यपि॥वायुभक्षोदिवारात्रौ
स्थित्वाम्भस्यर्यदृक्॥जप्त्वासहस्रंगायत्र्याःशुध्येद्वत्सवधादृते॥व्रतंचैवंदयाक्षां
तिर्दानंसत्यमकल्कता॥अहिंसास्तेयमाधुर्यंदमश्चेतियमाःस्मृता॥स्नानंमौनोपवा
सेज्या॥स्वाध्यायोपस्थसंग्रहः॥नियमागुरुशुश्रूषाशौचंक्रोधोप्रमादता॥गोमूत्रंगोमयंक्षी

रंदधिसर्पिःकुशोदकं॥पीत्वापरेह्युपवसेत्कृच्छ्रंसांतपनंचरेत्॥पृथक्संतपनंद्व्योःषडहःसोप
वासकः॥सप्ताहेनतुकृच्छ्रोयंमहासांतपनंस्मृतं॥पर्णानिवरराजीवविल्वपत्रकुशोदकोप्रत्य
कंप्रत्यहंपीत्वःपर्णकृच्छ्रउदाहृतः॥तप्तक्षीरघृतंचनामोकैकंप्रत्यहंपिबेत्॥एकरात्रोपवास
श्चतप्तकृच्छ्रउदाहृतः॥एकनक्तेननक्तेनतथैवायाचितेनचोपवासेनचैवायंपादकृच्छ्रउदाह
तः॥यथाकथंचित्त्रिगुणःप्राजापत्योयमुच्यते॥अयमेवातिकृच्छ्रःस्याद्यावाणिपूरान्नभोजनः
॥कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंशतिंद्वादशाहोपवासेनपाराकःपरिकीर्तितः॥पिण्या
कावामतक्रेवुसकूर्नांप्रतिवासरं॥एकरात्रोपवासश्चकृच्छ्रःसोम्योयमुच्यते॥एषात्रिरात्रम
भ्यासात्॥एकैकस्यथाकर्मतुल्यापुरुषसंज्ञितैः॥पंचदशाहिकः॥तिथिद्वयंचरेत्पिंड
नं॥शुक्लशिष्यंउसन्निभाद्यैकैकंह्रासयेत्कृष्णपिंडंचांद्रायणंचरेत्॥यथाकथंचित्पिंडानां
चत्वारिंशच्छतद्वयं॥मासेनैवोपभुंजीतचांद्रायणमथापरं॥कुर्यात्तुषवएतस्यांयीकृच्छ्रंचांद्रा
यणंतथा॥पवित्राणिजपेदृपिंडान्गायत्र्यावासिसंत्रयेत्॥अनादिष्टेषुपापेषुश्रुतिःश्रेष्ठा
द्वायणेनचाधर्मार्थियश्चरेदेतद्वैदुस्यतिसत्लोकतां॥कृच्छ्रकृद्धर्मकामस्तुमहतींश्रियमाप्नु
यात्॥यथायुरुक्तफलंप्राप्नोतिपुरुषसमाहितः॥श्रुत्वेतादृक्ऋषयोधर्मान्याज्ञवल्क्येनभा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

षिता ऊचुर्महात्मानं योगीड्यमितौजसं॥ यद्धारयिष्यंति धर्मशास्त्रमतंद्रिताः॥ इहलोके यशः प्राप्य तेयास्यंति त्रिविष्टपं॥ विद्यार्थी प्राप्नुयाद्विद्यां इहलोके यशः प्राप्य तेयास्यंति त्रिविष्टपं॥ धनकामो धनं तथा॥ आयुः कामस्तथैवायुः श्रीकामो महतीं श्रियं स्त्रीकत्रयमपि ह्यस्मात्त्रयः श्राद्धे श्रावयिष्यंति पितृणां तस्य तृप्तिः स्यादक्षयान्नात्र संशयः॥ ब्राह्मणः पात्रतां याति क्षत्रियो विजयी भवेत्॥ वैश्यश्चधान्यधनवान्भूयास्यशास्त्रस्यधारणात्॥ यइदं श्रावयेद्विद्वान्द्विजान्पर्वसु पर्वसु॥ अश्वमेधफलं तस्य तज्ज्ञानमनुमन्यते॥ ऋत्वेतत्याज्ञवल्क्योपि प्रीतात्मा मुनिभाषितं॥ एवमास्त्विति होवाचनमस्कृत्यस्वयंभुवे॥ इतिशौर्यधैर्यगांभीर्यौदार्यसंपन्न श्रीमहंत श्रीहरिदासतत्पुत्रमहंत श्रीसुंदरदाससंगृहीतेकांचोजप्रकाशेप्रायश्चित्तपरिच्छेदः॥ ॥